National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 216-218
© 2025 NJHSR
www.sanskritarticle.com

**ना. शिव सुब्रह्मण्यम्**
शोधच्छात्रः, शुक्लयजुर्वेद काण्वशाखा,
श्री वेङ्कटेश्वर वेद विश्वविद्यालयः,
तिरुपति

.

**Correspondence:**
**ना. शिव सुब्रह्मण्यम्**
शोधच्छात्रः, शुक्लयजुर्वेद काण्वशाखा,
श्री वेङ्कटेश्वर वेद विश्वविद्यालयः,
तिरुपति

# वर्णरत्नप्रदीपिकाशिक्षोक्तरीत्य पूर्वाङ्ग – पराङ्ग निरूपणम्

**ना. शिव सुब्रह्मण्यम्**

वेदः परब्रह्मणः निश्वासरूपः इत्ययं विषयः बृहदारण्यके एवमाह "**अस्य महतो भूतस्य निश्वसितमेतत्**[1]" इति। अतः वेदः अपौरुषेयः निश्वसितत्वात्, एवञ्च "**अनन्ता वै वेदाः**[2]" इति शृतिवाक्येन वेदाः अनन्ताः इत्यपिज्ञातुम् शक्यते। अनादिकालादारभ्य इदनींतनपर्यन्तम् वेदाध्ययनं गुरूच्चारणानूच्चारणपूर्वक-परम्परया प्रचलति, तत् कारणेन वेदस्य "**श्रुतिः**" इति नाम अस्ति।

वेदाः चत्वारः "1.**ऋग्वेदः** 2.**यजुर्वेदः** 3.**सामवेदः** 4.**अथर्ववेदः**" इति। ऋग्वेदे मन्त्राः सर्वे गायत्र्यादिच्छन्दोबद्धाः देवतानां स्तावकत्वेन पठ्यन्ते। यजुर्वेदे गद्यरूपेण पठ्यमानाः मन्त्राः यज्ञक्रतुषु विनियुज्यमानाः सन्ति। गानप्रधानो वेदः सामवेदः।
एवं धर्मानुष्ठानार्थमुपयुज्यमानानां मन्त्राणां अदुष्टत्वं नितरामपेक्षते। तदुच्यते पाणिनीयशिक्षायाम् -

**मन्त्रोहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्**[3]॥ इति ।

अत एव महर्षिभिः लक्षणग्रन्थाः प्रोक्ताः। तदुच्यते वाजसनेयिप्रातिशाख्ये **स्याद्वाम्नायधर्मित्वाच्छन्दसि नियमः**[4] इति सूत्रेण। एते च लक्षणग्रन्थाः तत्तच्छाखाभेदेन बहुधा विद्यन्ते। तत्र शुक्लयजुर्वेदसम्बद्धेषु वाजसनेयिप्रातिशाख्यं भगवता कात्यायनेन उपदिष्टं प्राथम्यं वहति। अस्मिन् ग्रन्थे वैदिकशब्दानां स्वरसंस्कारनियमाः कथ्यन्ते। इदं प्रातिशाख्यमेव अनुसृत्य अमरेशाचार्येण **वर्णरत्नप्रदीपिका शिक्षा** इति नाम्ना एको ग्रन्थः आरचितः।
अस्यां वर्णरत्नप्रदीपिकाशिक्षायां व्यञ्जनानां **पूर्वाङ्गत्वपराङ्गत्वं** निरूप्यते। अयं च विषयः वाजसनेयिप्रातिशाख्ये पञ्चभिः सूत्रैः उपदिष्टः। स एव अत्र शिक्षायां विविच्य सोदाहरणं सविवरणं उपस्थापितः।

- **स्वरः**

वैदिकसाप्रदाये स्वरमन्त्रोच्चारणस्य अत्यन्तप्रामुख्यता अस्ति। स्वरभेदेन पदस्यार्थः तद्वारा मन्त्रस्यार्थः भिद्यते। तथाहि "**मा च**[5]" इति सूत्रेण मा इति पदमनुदात्तं भवति चेत् अस्मच्छब्दार्थकं भवति इति ज्ञायते। तदेव पदं यदि उदात्तं स्यात् तदा निषेधवाचि भवति इति भाष्यादिपर्यालोचनया ज्ञायते।
स्वरः "**उदात्त – अनुदात्त – स्वरित**" इति भेदेन ऋग्यजुस्सामाथर्ववेदेषु प्रसिद्धः।

**उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः**[6]।

इति याज्ञवल्क्यशिक्षा श्लोकेन ज्ञायते, सामवेदे सप्तस्वराः सन्ति ते च स्वराः अपि उदात्तादिषु अन्तर्भवन्तीति याज्ञवल्क्यशिक्षायां निरूप्यते।

**स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च** [7]।

**स्वरप्रधानं त्रैस्वर्यम्**[8]**.**

इति याज्ञवल्क्यशिक्षावचनेन उदात्तादिस्वराः अच् वर्णप्रधानाः इति ज्ञायते। तर्हि व्यञ्जनवर्णस्य स्वरः नास्ति वा ? इति चेत्, सत्यम्। व्यञ्जनानि स्वयं स्वरयुक्तानि न भवन्ति। किन्तु स्वरस्य साहाय्येन

उच्चार्यन्ते "**व्यज्यन्ते स्वरसाहाय्यमादाय उच्चार्यन्ते इति व्यञ्जनम्**" इति व्युत्पत्या ज्ञायते। किञ्च भगवता कात्ययनेनापि प्रातिशाख्ये उच्यते "**व्यञ्जन-स्वरेण सस्वरं**[9]" इति। तथैव "**व्यञ्जनं तेन सस्वरम्**" इति याज्ञवल्क्यशिक्षावचनेनापि ज्ञायते।

प्रायशः व्यञ्जनानि स्वपूर्वपरान्यतरस्वरस्य स्वरमेव आप्नुवन्ति। किन्तु यत्र बहुव्यञ्जनसंयोगो भवति तत्र मध्यगतानां व्यञ्जनानां पूर्वः परो वा स्वरो न भवतीत्यतः जायते संशयः एतेषां कः स्वरः इति। तत्समाधातुमेव इदं प्रकरणमारब्धं वाजसनेयिप्रातिशाख्ये। तदेवानुसृत्य वर्णरत्नप्रदीपिकाशिक्षायामपि इदं प्रकरणमारब्धम्। तदत्र विविच्य उच्यते।

**अथातोऽवरतो वच्मि चर्चा पूर्वपराङ्गयोः ।**
**स्वारप्रयोजना चासौ वेदितव्या विचक्षणैः**[10]**॥**

अस्य श्लोकस्यायमाशयः - अथ स्थानकरणप्रयत्नादिनिरूपणानन्तरं क्रमप्राप्तः पूर्वाङ्गपराङ्गयोः वर्णयोः विचारः क्रियते । स्वरेण विना व्यञ्जनानां सहयोगः सहोच्चारणं वा संयोगः इति वर्णरत्नप्रदीपिकाशिक्षायां कथ्यते । सः संयोगवर्णः यदि स्वरपूर्वः तदा तस्य संयोगादिवर्णस्य द्वित्वं स्यात् । एवं द्विगुणीभूतानां वर्णानां अङ्गत्वकल्पनमेव अत्र विचार्यते । अस्याः चर्चायाः प्रयोजनं तु व्यञ्जनानां स्वरविवेकः। उदाहरणादिकं अग्रे निरूपयन्ति ।

**सँय्योगादिवर्णस्य पूर्वाङ्गत्वनिरूपणम्**

**संयोगस्यादिभूतो यः स पूर्वाङ्गं भवेद्यथा।**
**अश्वः शशवसंयोगे शः पूर्वाङ्गं शवोऽन्यतः**[11]**॥**

अस्य श्लोकस्यायमाशयः – सँय्योगस्य आदिवर्णः पूर्वाङ्गम् भजते। सँय्योगविषये प्रातिशाख्ये एवमाह- **स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र**[12] स्वरात् परस्य संयोगादिभूतः वर्णः द्विरुच्यते। तयोः वर्णयोः प्रथमवर्णः पूर्वस्वरस्याङ्गं भवति। पूर्वस्वरः येन स्वरेण स्वर्यते तं स्वरं प्राप्नोतीत्यर्थः।

उदाहरणं तु "**अश्वस्तूपरः**[13]" इत्यत्र - अश्वः इति पदे अकारपरस्य संयोगस्य आदिभूतः शकारः द्वित्वं प्राप्नोति । तस्मिन् **शशवसंयोगे** तत्र प्रथम**शकारः** पूर्वाङ्गं पूर्वस्य अकारस्य अङ्गं भूत्वा तदुदात्तस्वरं प्राप्नोति । एवं अवशिष्टशकारवकारौ विसर्गश्च अन्यतः परस्य स्वरस्य अङ्गत्वं प्राप्य स्वरितस्वरं प्राप्नुवन्ति ।

यमवर्णस्य पूर्वाङ्गत्वनिरुपणम्-

**यमश्च पूर्वस्याङ्गं स्याच्चकारात्पूर्वसंयुतः।**
**रुक्मः पूर्वस्य कयमौ उत्तरस्य तु मः स्मृतः**[14]**॥**

अस्य श्लोकस्यायमाशयः - यमवर्णः पूर्वस्वरस्याङ्गं भवति। यमो नाम- स्पर्शेषु अपञ्चमः, स्पर्शः पञ्चमैः यदा संयुक्तः तदा यमो नाम पूर्वसदृशो वर्णः द्वयोः व्यञ्जनयोः मध्ये उद्भवति । तस्य "विच्छेदम्" इत्यपि संज्ञा दृश्यते प्रातिशाख्ये । अत्र चकारात् संयोगादिः गृह्यते। स च यमवर्णश्च पूर्वस्वरस्याङ्गे भवतः।

उदाहरणं तु – **रुक्मः**[15] इत्यत्र ककारयमौ पूर्वस्याङ्गे भवतः। अवशिष्टः मकारः विसर्गश्च परस्याङ्गं भवति ।

**क्रमजस्य पूर्वाङ्गत्वनिरीपणम्**

**संयोगादिपरद्वित्वे पूर्वाङ्गं क्रमजं यथा ।**
**पार्श्व्यं रशौ तु पूर्वस्य परस्य शवयात्मकम्**[16]**॥**

अस्य श्लोकस्यायमाशयः - क्रमजं पूर्वाङ्गं भवति। क्रमजमित्युक्ते संयोगादिवर्णस्य यत्र द्वित्वं निषिध्यते, तत्र तत्परवर्णः द्वित्वं प्राप्नोति। तदेव क्रमजमित्युच्यते। वाजसनेय प्रातिशाख्ये "**परं तु रेफहकाराभ्यां**[17]" इति सूत्रेण रेफहकारयोः द्विर्भावं निषेधितम् । तयोः वर्णयोः सह सन्धौ परवर्ण एव द्वित्वमाप्नोति अतः क्रमात् जातं क्रमजमिति अर्थः स्वीकरणीयः ।

उदाहरणं यथा "**अन्तःपार्श्व्यम्**[18]" इत्यत्र रेफशकारौ पूर्वस्याङ्गं भवतः, परभूताः शकारवकारयकाराः तु परस्याङ्गानि भवन्ति ।

**क्रमजोत्तरवर्णस्य पूर्वाङ्गत्वनिरूपणम्**

**क्रमजाच्चोत्तरं स्पर्शे परे पूर्वाङ्गकं यथा।**
**पाष्ण्र्या पूर्वस्य रषणाः परस्याङ्गं णयात्मकम्** [19]**॥**

अस्य श्लोकस्यायमाशयः - वाजसनेयिप्रातिशाख्ये "**ऊष्मान्तस्थाभ्यश्च स्पर्शाः**[20] " इति सूत्रेण संयोगे ऊष्मान्तस्थाभ्यः परः स्पर्शः द्विरुच्यते न तु ऊष्मान्तस्थे इत्युक्तत्वात् क्रमजात् परवर्तिनः स्पर्शस्यैवद्विर्भावम्। एवं च उपलक्षिक्षितक्रमजात् परः वर्णः स्पर्शे परे पूर्वाङ्गं भवतीति।

उदाहरणं तु– "**पाष्ण्र्या**[21]" इत्यत्र रेफषकारणकारद्वययकाराणां संयोगः, तत्र रेफस्य संयोगादित्वात् पूर्वाङ्गत्वम् , उपलक्षितक्रमजः षकारः पूर्वाङ्गमेव , "**तस्माच्चोत्तरं स्पर्शे**[22]" इति कृत्वा पूर्वणकारः पूर्वाङ्गं भवति। । द्वितीयणकारो यकारश्च उत्तराङ्गे भवतः ।

**अयोगवाहानाम् पूर्वाङ्गत्वनिरुपणम्-**

वाजसनेयिप्रातिशाख्ये एतावत्पर्यन्तमेव पूर्वाङ्गत्वपराङ्गत्व-निरूपणं कृतम्। वर्णरत्नप्रदीपिकाकारस्तु अन्येषामपि अङ्गत्वविचारं करोति। तथाहि

**अनुस्वारो विसर्गश्च नासिक्योऽथ यमास्तथा।**
**जिह्वामूलमुपद्ध्मा च नवैते स्युः पराश्रयाः**[23]**॥**
**सँय्योगवाहा एवैते निजस्वरविवर्जिताः ।**
**पूर्वस्याङ्गं भवन्त्येते स्वर एतेषु पूर्ववत्**[24]**॥**

अस्य श्लोकस्यायमाशयः – अयोगवाहाः पूर्वाङ्गम् भजते। के ते अयोगवाहाः इत्युक्ते अनुस्वारः, विसर्गः, नासिक्यः, यमवर्णाः, जिह्वामूलं, उपध्मा च नवसंख्याकाः अयोगवाहाः परान् (अन्यान्) आश्रित्य तिष्ठन्तीति एते पराश्रयाः। अपि च एते संयोगस्य विघ्नं न कुर्वन्ति। यथा संयोगं वहन्ति। निजस्वरविवर्जिताः एते पूर्वस्य स्वरस्याङ्गं भवन्ति । एतेषु स्वरः पूर्वस्वरवत् ।

**स्वरभक्तेः पूर्वाङ्गत्वनिरूपणम्**

**स्वरभक्तिश्च पूर्वाङ्गं देवम्बर्हिरुदाहृतिः ।**
**इकारे च तथोकारे तां यत्नेन विवर्जयेत्** [25]**॥**

अस्य श्लोकस्यायमाशयः - भज्यते सेव्यते वर्णान्तरं इति भक्तिः, स्वरस्य भक्तिः स्वरभक्तिः। अनन्तरश्लोके अस्याः स्वरभक्तेः लक्षणं निरूपयति। सा च स्वरभक्तिः पूर्वस्य स्वरस्याङ्गं भवति इति।
उदाहृतिस्तु- देवं बर्हिः इति ।

**यद्व्यञ्जनं च यस्याङ्गं तत्तेन सस्वरं भवेत्।**
**एतदर्थमिदं प्रोक्तं स्वारसन्देहभेदकम्** [26]**॥**

अस्य श्लोकस्यायमाशयः - पूर्वोक्तप्रकारेण संयोगे यद्व्यञ्जनं वा व्यञ्जनसमूहं वा यस्य स्वरस्य (पूर्वस्य परस्य वा) अङ्गमिति विषदीकृतं तद्व्यञ्जनं तद्व्यञ्जनसमूहं वा तेनाङ्गिना (स्वरेण) सस्वरं स्वरयुक्तं भवति। व्यञ्जनमपि अङ्गिना सह उदात्तादि स्वरान् प्राप्नोतीत्यर्थः । अयं विचारस्तु संयोगपिण्डे स्वरसन्देहः यथा न स्यात् तदर्थमेव प्रोक्तमिति ज्ञातव्यम् ।
याज्ञवल्क्यशिक्षायामप्युच्यते।

**दुर्बलस्य यथा राष्ट्रं हरते बलवान् नृपः ।**
**एवं व्यञ्जनमासाद्य अकारो हरति स्वरम्**[27]**॥**

**सङ्केताक्षरसूची**

- बृ.उ - बृहदारण्यकोपनिषद्
- पा.शि –पाणिनीयशिक्षा
- वा.प्रा – वाजसनेयप्रातिशाख्यम्
- या.शि – याज्ञवल्क्यशिक्षा
- व.र.प्र.शि – वर्णरत्नप्रदीपिकाशिक्षा
- का.सं – काण्वसंहिता
- मा.सं - माध्यन्दिनीयसंहिता
- पा.शि- पाणिनीयशिक्षा

**सहायग्रन्धसूची**

1.शुक्लयजुर्वेदकाण्वसंहिता
Chayamartanda sampradayika shikhana samiti, Tirupati, 517501 ph.9494490886

2.वाजसनेयिप्रातिशाख्यम्,

3. माध्यन्दिनसंहिता
Chowkhamba sanskrita pratishthan,4360/4, New delhi 110002

4.शिक्षासन्ग्रहः
Sampurnananda Sanskrit university , Varanasi-221001

5. बृहदारण्यकोपनिषत
Chayamartanda sampradayika shikhana samiti, Tirupati, 517501 ph.9494490886

**पादटिप्पणी**

[1]बृ.उ. 2-4-10
[2]तै.का.प्र 3-10-11-4
[3]पा.शि. 52
[4]वा.प्रा 1-4
[5]वा.प्रा. – 2-4
[6]या.शि- 1-1
[7]या.शि- 2-30
[8]या.शि-2-30
[9]वा.प्रा – 1-107
[10] व.र.प्र.शि.44
[11] व.र.प्र.शि.45
[12] वा.प्र.4-101
[13] का.सं-26-1-1
[14] व.र.प्र.शि.46
[15] का.सं-13-1-1
[16] व.र.प्र.शि-47
[17] वा.प्रा-4-102
[18] का.सं 39-8-1
[19] व.र.प्र.शि-48
[20] वा.प्रा 4-103
[21] मा.सं-25-40
[22] वा.प्रा-1.105
[23] व.र.प्र.शि-50
[24] व.र.प्र.शि-51
[25] व.र.प्र.शि-52
[26] व.र.प्र.शि-49
[27] याज्ञवल्क्यशिक्षा – 2-29